# श्री विष्णु पुराण अन्तर्गता
## (प्रथमांशे द्वादशाध्याये)
## ॥ धृव स्तुतिः ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिः आदिप्रकृतिः यस्य रूपं नतोऽस्मि तम् ॥ 1

शुद्धसूक्ष्मोऽखिलव्यापी प्रधानात्परतः पुमान् ।
यस्य रूपं नमस्तस्मै पुरुषाय गुणात्मने ॥ 2

भूतादीनां समस्तानां गन्धादीनां च शाश्वतः ।
बुद्ध्यादीनां प्रधानस्य पुरुषस्य च यः परः ॥ 3

तं ब्रह्मभूतं आत्मानं अशेषजगतः पतिम् ।
प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वर ॥ 4

बृहत्त्वात् ब्रह्मणत्वात् च यद्रूपं ब्रह्मसंज्ञितम् ।
तस्मै नमस्ते सर्वात्मन् योगिचिन्त्याविकारिणे ॥ 5

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सर्वव्यापी भुवः स्पर्शात् अत्यतिष्टत् दशाङ्गुलम् ॥ 6

यद्भूतं यच्च वै भव्यं पुरुषोत्तम तद्भवान् ।
त्वत्तो विराट् स्वराट् सम्राट् त्वत्तश्चापि अधिपूरुषः ॥ 7

अत्यरिच्यत् सोऽधश्च तिर्यगूर्ध्वं च वै भुवः ।
त्वत्तो विश्वमिदं जातं त्वत्तो भूतं भविष्यति ॥ 8

त्वद्रूपधारिणश्चान्तः सर्वभूतं इदं जगत् ।
त्वत्तो यज्ञः सर्वहुतः पृषदाज्यं पशुर्द्विधा ॥ 9

त्वत्तो ऋचोऽथ सामानि त्वत्तश्छन्दांसि जज्ञिरे ।
त्वत्तो यजूंषि अजायन्त त्वत्तोऽश्वाः च एकतोदतः ॥ 10

गावस्त्वत्तः समुद्भूताः त्वत्तोऽजा अव्यो मृगाः ।
त्वन्मुखाद्ब्राह्मणा बाहवोः तव क्षत्रं अजायत ॥ 11

वैश्यास्तवोरुजाः शूद्राः तव पद्भ्यां समुद्गताः ।
अक्ष्णोः सूर्योऽनिलः प्राणात् चन्द्रमा मनसस्तव ॥ 12

प्राणो नः सुषिरात् जातः मुखात् अग्निः अजायत ।
नाभितो गगनं द्यौश्च शिरसः समवर्तत ॥ 13

दिशश्श्रोत्रात् क्षितिः पद्भ्यां त्वत्तस्सर्वमभूदिदम् ।
न्यग्रोधः सुमहान् अल्पे यथा बीजे व्यवस्थितः ।
संयमे विश्वं अखिलं बीजभूते तथा त्वयि ॥ 14

बीजात् अङ्कुरसंभूतो न्यग्रोध्यस्तु समुच्छ्रितः ।
विस्तारं च यथा याति त्वया सृष्टं तथा जगत् ॥ 15

यथा हि कदली नान्या त्वक्पत्रात् अथ दृश्यते ।
एवं विश्वस्य नान्यस्त्वं त्वत्स्थायीश्वर दृश्यते ॥ 16

ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंस्थितौ ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥ 17

पृथग्भूतैकभूताय भूतभूताय ते नमः ।
प्रभूतभूतभूताय तुभ्यं भूतात्मने नमः ॥ 18

व्यक्तं प्रधानपुरुषौ विराट् सम्राट् स्वराट् तथा ।
विभाव्यतेऽन्तःकरणे पुरुषेष्वक्ष्यो भवान् ॥ 19

सर्वस्मिन् सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृत् ।
सर्वं त्वत्तः ततश्च त्वं नमस्सर्वात्मनेऽस्तु ते ॥ 20

सर्वात्मकोऽसि सर्वेश सर्वभूतस्थितो यतः ।
कथयामि ततः किं ते सर्वं वेत्सि हृदि स्थितम् ॥ 21

सर्वात्मन् सर्वभूतेश सर्वसत्त्वसमुद्भव ।
सर्वभूतो भवान्वेत्ति सर्वसत्त्वमनोरथम् ॥ 22

यो मे मनोरथो नाथ सफलस्स त्वया कृतः ।
तपश्च तप्तं सफलं यद्दृष्टोऽसि जगत्पते ॥ 23

**॥ धृव स्तुति संपूर्णम् ॥**